## श्रीराममङ्गलाशासनम्

एवमेतत् पुरावृत्तं आख्यानं भद्रमस्तु वः।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्॥ १

लाभ स्तेषां जय स्तेषां कुत स्तेषां पराभवः।
येषा मिन्दीवरश्यामो हृदये सुप्रतिष्ठितः॥ २

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितो ब्राह्मणा स्सन्तु निर्भयाः॥ ३

कावेरी वर्धतां काले काले वर्षतु वासवः।
श्रीरङ्गनाथो जयतु श्रीरङ्ग श्रीश्च वर्धताम्॥ ४

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्यायेन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्यः शुभमस्तुनित्यं
लोकास्समस्ताः सुखिनोभवन्तु॥ ५

मङ्गलं कोसलेन्द्राय महानीय गुणाब्धये।
चक्रवर्ति तनूजाय सार्वभौमाय मङ्गलं ॥ ६

वेदवेदान्त वेद्याय मेघश्यामलमूर्तये।
पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम्॥ ७

विश्वामित्रान्त-रङ्गाय मिथिलानगरीपतेः।
भाग्यानां परिपाकाय भव्यरूपाय मङ्गलम्॥ ८

पितृभक्ताय सततं भ्रातृभिः सह सीतया ।
नन्दिताखिललोकाय रामभद्राय मङ्गलम् ॥ ९

त्यक्तसाकेत वासाय चित्रकूट विहारिणे ।
सेव्याय सर्वयमिनां धीरोदाराय मङ्गलम् ॥ १०

सौमित्रिणा च जानक्या चापबाणासिधारिणे ।
संसेव्याय सदा भक्त्या स्वामिने मम मङ्गलम् ॥ ११

दण्डकारण्यवासाय खण्डितामरशत्रवे ।
गृद्ध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गलम् ॥ १२

सादरं शबरीदत्त फलमूलाभिलाषिणे ।
सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मङ्गलम् ॥ १३

हनुमत्समवेताय हरीशा-भष्टि-दायिने ।
वालि प्रमथनायाऽस्तु महाधीराय मङ्गलम् ॥ १४

श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे ।
जितराक्षसराजाय रणधीराय मङ्गलम् ॥ १५

आसाद्य नगरीं दिव्यां अभिषिक्ताय सीतया ।
रजाधिराजराजाय रामभद्राय मङ्गलम् ॥ १६

विशिष्टाद्वैतसिद्धान्त प्रचारैकविहारिणे । श्रीमन्नारायाणाचार्य स्वामिने नित्यमङ्गळम् ॥

यावत्प्रपञ्चसंपूज्य चरणाय महात्मने । श्रीमन्नरायणाचार्य यतिराजाय मङ्गळम् ॥

मङ्गळा शासनपरैः मदाचार्यपुरोगमैः । सर्वैश्च पूर्वैराचार्यैं सत्कृतायास्तु मङ्गळम् ॥ १५

कायेन वाचा मनसेन्द्रियार्वा बुद्ध्यात्मनावाप्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥ १८

श्रीमनारायणेति समर्पयामि।

ॐ श्रीकृष्णार्पणमस्त

## *Śrī rāma maṅgaḻāśāsanam*

*maṅgalaṁ kosalendrāya mahānīya guṇābdhaye*|
*cakravarti tanūjāya sārvabhaumāya maṅgalaṁ*|| **1**

*vedavedānta vedyāya meghaśyāmalamūrtaye*|
*puṁsāṁ mohanarūpāya puṇyaślokāya maṅgalam*|| **2**

*viśvāmitrānta-raṅgāya mithilānagarīpateḥ*|
*bhāgyānāṁ paripākāya bhavyarūpāya maṅgalam*|| **3**

*pitṛbhaktāya satataṁ bhrātṛbhiḥ saha sītayā*|
*nanditākhilalokāya rāmabhadrāya maṅgalam*|| **4**
*tyaktasāketa vāsāya citrakūṭa vihāriṇe*|
*sevyāya sarvayaminā̇ṁ dhīrodārāya maṅgalam*|| **5**
*saumitriṇā ca jānakyā cāpabāṇāsidhāriṇe*|
*saṁsevyāya sadā bhaktyā svāmine mama maṅgalam*|| **6**

*daṇḍakāraṇyavāsāya khaṇḍitāmaraśatrave* ।
*gṛdrarājāya bhaktāya muktidāyāstu maṅgalam* ।। 7

*sādaraṁ śabarīdatta phalamūlābhilāṣiṇe* ।
*saulabhyaparipūrṇāya sattvodriktāya maṅgalam* ।। 8
*hanumatsamavetāya harīśābhīṣṭadāyine* ।
*vāli pramathanāyā'stu mahādhīrāya maṅgalam* ।। 9

*śrīmate raghuvīrāya setūllaṅghitasindhave* ।
*jitarākṣasarājāya raṇadhīrāya maṅgalam* ।। 10

*āsādya nagarīṁ divyāṁ abhiṣiktāya sītayā* ।
*rājādhirājarājāya rāmabhadrāya maṅgalam* ।। *11*

*viśiṣṭādvaita-siddhānta pracāraika-vihāriṇe* ।
*śrīmannārāyāṇācārya svāmine nitya-maṅgaḻam* ।।

*yāvat-prapañca-sampūjya caraṇāya mahātmane* ।
*śrīmannarāyaṇācārya yatirājāya maṅgaḻam* ।।

*maṅgaḻā śāsanaparaiḥ madācārya-purogamaiḥ* ।
*sarvaiśca pūrvairācāryai satkṛtāyāstu maṅgaḻam* ।। *15*
*yadakṣara padabhraṣṭaṁ mātrāhīnaṁ tu yadbhavet* ।
*tatsarvaṁ kṣamyatāṁ deva ! nārāyaṇa namo'stute* ।।
*kāyena vācā manasendriyairvā*
*buddhyātmanā vā prakṛteḥ svabhāvāt* ।
*karomi yadyat sakalaṁ parasmai*
*nārāyaṇāyeti samarpayāmi* ।।
*śrīmanārāyaṇāyeti samarpayāmi* ।।

*oṁ sarvaṁ śrī kṛṣṇārpaṇamastu* ||

*oṁ asamad-gurubhyo namaḥ*

evametat puraavRRittaM aakhyaanaM bhadramastu vaH.
pravyaaharata visrabdhaM balaM viSNoH praavardhataam.. 1

laabha steShaaM jaya steShaaM kuta steShaaM paraabhavaH.
yeaShaa mindiivarashyaamo hRRidaye supratiShThitaH.. 2

kaale varShatu parjanyaH pRRithivii sasyashaalinii.
desho.ayaM xobharahito braahmaNaa ssantu nirbhayaaH.. 3

kaaverii vardhataaM kaale kaale varShatu vaasavaH.
shriira~Nganaatho jayatu shriira~Nga shriishca vardhataam.. 4

svasti prajaabhyaH paripaalayantaaM
nyaayena maargeNa mahiiM mahiishaaH.
gobraahmaNebhyaH shubhamastunityaM
lokaassamastaaH sukhinobhavantu.. 5

ma~NgalaM kosalendraaya mahaaniiya guNaabdhaye.
cakravarti tanuujaaya saarvabhaumaaya ma~NgalaM.. 6

vedavedaanta vedyaaya meghashyaama~Ngalamuurtaye.
puMsaaM mohanaruupaaya puNyashlokaaya ma~Ngalam.. 7

vishvaamitraanta-ra~Ngaaya mithilaanagariipateH.
bhaagyaanaaM paripaakaaya bhavyaruupaaya ma~Ngalam.. 8

pitRRibhaktaaya satataM bhraatRRibhiH saha siitayaa.
nanditaakhilalokaaya raamabhadraaya ma~Ngalam.. 9

tyaktasaaketa vaasaaya citrakuuTa vihaariNe.
sevyaaya sarvayaminaaM dhiirodaaraaya ma~Ngalam.. 10

saumitriNaa ca jaanakyaa caapabaaNaasidhaariNe.
saMsevyaaya sadaa bhaktyaa svaamine mama ma~Ngalam.. 11

daMDakaaraNyavaasaaya khaNDitaamarashatrave.
gRRidraraajaaya bhaktaaya muktidaayaastu ma~Ngalam.. 12

saadaraM shabariidatta phalamuulaabhilaaSiNe.

saulabhyaparipuurNaaya  sattvodriktaaya ma~Ngalam .. 13

hanumatsamavetaaya  hariishaabhiiSTadaayine .
vaali pramathanaayaa.astu  mahaadhiiraaya ma~Ngalam .. 14

shriimate raghuviiraaya  setuulla~Nghitasindhave.
jitaraaxasaraajaaya  raNadhiiraaya ma~Ngalam .. 15

aasaadya nagariiM divyaaM  abhiSiktaaya siitayaa.
rajaadhiraajaraajaaya  raamabhadraa ma~Ngalam .. 16

ma~NgalaashaasanaparaiH  madaacaaryapurogamaiH.
sarvaishca puurvai raacaaryaiH  satkRRitaayaa.astu ma~Ngalam .. 17

kaayena vaacaa manasendriyaarvaa
buddhyaatmanaavaaprakRRiteH svabhaavaat.
karomi yadyat sakalaM parasmai
naaraayaNaayeti samarpayaami.. 18

shriimanaaraayaNeti samarpayaami.
OM shriikRRiSNaarpaNamastu